।।श्रीः।।

अगजाननपद्मार्कं गजाननमहर्निशं।

अनेकदं तं भक्तानामेकदन्तमुपास्महे।।१।।

1. I meditate constantly on Lord Ganesa who has an elephant's face and a single tusk, who is like the sun for the lotus that is the face of the Daughter of the Mountain (Parvati) and who confers many boons on devotees.

सदाशिवसमारम्भां शंकराचार्यमध्यमाम्।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्।।२।।

2. I bow down to the succession of Gurus starting with Lord Sadasiva and leading up to my own Acharya, with Sri Sankara Bhagavatpada in the middle.

श्रुतिस्मृतिपुराणानामालयं करुणालयम्।

नमामि भगवत्पादशंकरं लोकशंकरम्।।३।।

3. I prostrate before Sri Sankara Bhagavatpada, the repository of the Srutis, Smritis and Puranas, the abode of compassion, who confers blessings on the world.

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम्।

नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम्।।४।।

4. I prostrate before Sri Chandrasekhara Bharati Mahaswami, ever immersed in meditation on the Self, totally averse to objects of sense and profoundly erudite in the scriptures.

विवेकिनं महाप्रज्ञं धैर्योदार्यक्षमानिधिम्।

सदाऽभिनवपूर्वं तं विद्यातीर्थगुरुं भजे।।५।।

5. I worship my Guru Sri Abhinava Vidyatirtha Mahaswami, who is endowed with discriminative knowledge and profound wisdom and who is the repository of fortitude, magnanimity and forbearance.

विद्यारण्यादियोगीन्द्राधिष्ठितं पीठमुत्तमम्।

अलंकुर्वाणमधुना भारतीतीर्थमाश्रये।।६।।

6. I take refuge in Sri Bharati Tirtha Mahaswami who now adorns the great Sarada Peetham, presided over in the past by such illustrious Yogis as Swami Vidyaranya.

स्मारंस्मारं जनिमृतिभयं जातनिर्वेदवृत्ति-
र्ध्यायंध्यायं पशुपतिमुमाकान्तमन्तर्निषण्णम्।
पायंपायं सपदि परमानन्दपीयूषधारां
भूयोभूयो निजगुरुपदाम्भोजयुग्मं नमामि।।७।।

(स्वाराज्यसिद्धिः १.२)

7. Detachment having arisen in me because of my pondering over the frightful prospect of repeated births and deaths, meditating on Lord Pasupati, the Consort of Uma, residing in my heart, drinking in the flowing nectar of supreme bliss, I prostrate again and again before the pair of lotus-feet of my Guru.

।।श्रीगुरुभ्यो नमः।।

।।ओं श्रीशारदाचद्रमौलीश्वराभ्यां नमः।।

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाण पारावारपारीण यमनियमासनप्राणायामप्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठतपश्चक्र-वर्ती अनाद्यविच्छिन्न श्रीशंकराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकल निगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग-प्रवर्तक सर्वतन्त्रस्वतन्त्रादिराजधानी विद्यानगर-महाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य श्रीमद्राजाधिराज गुरुभूमण्डलाचार्य ऋश्यशृङ्ग-पुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशंकर पादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थ-स्वामि गुरुकरकमलसञ्जात श्रीजगद्गुरु शृङ्गेरी श्रीभारतीतीर्थस्वामिपादानां पादसरोरुहस्मरणं शिवम्।

# ।।श्रीगुरुगीता।।

( From Skanda Purana, Brahma Samhita)

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः।

गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः।।१।।

1.The Guru is Brahma, the Guru is Vishnu, the Guru is the Lord Mahesvara; the Guru is the Supreme Brahman Himself. Prostrations to the Guru.

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः।।२।।

2.Prostrations to the Guru by whom the eye blinded by the darkness of ignorance has been opened with the collyrium of knowledge.

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्।

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।३।।

3.Prostrations to the Guru who reveals the true nature of ‘That’ (Brahman), which is infinite and indivisible, and which pervades all creation, both moving and non-moving.

स्थावरं जंगमं व्याप्तं यत्किंचित्सचराचरम्।

त्वं पदं दर्शितं येन तस्मै श्रीगुरवे नमः।।४।।

4.Prostrations to the Guru who reveals the true nature of 'Thou' (Jivatma) which dwells in all creation, both moving and non-moving.

चिन्मयव्यापितं सर्वं त्रैलोक्यं सचराचरम्।

असित्वं दर्शितं येन तस्मै श्रीगुरवे नमः।।५।।

5. Prostrations to the Guru by whom is indicated the meaning of the term 'Asi' (the identity of 'That' and 'Thou'), which shows that all the three worlds, consisting of both moving and stationary creatures are pervaded by Pure Consciousness (Brahman).

निमिषार्धार्धपादाद्वा यद्वाक्याद्वै विलोक्यते।

स्वात्मानं स्थिरमाधत्ते तस्मै श्रीगुरवे नमः।।६।

6. Prostrations to the Guru by whose words, even in half a moment or a half or quarter thereof, the firm realisation of one's Self is attained.

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।

तस्यैते कथिताह्यर्थाः प्रकाशन्ते महात्मनः।।७।।

7. Only to that great soul who has supreme
devotion to God and equal devotion to his Guru will the scriptures reveal their real import.

त्वं पिता त्वं च मे माता त्वं बन्धुस्त्वं च देवता।

संसारभीतिभंगाय तस्मै श्रीगुरवे नमः।।८।।

8. You (Guru) are my father, you are my mother, you are my well-wisher and you are my God. I prostrate to the Guru for the eradication of the fear of Samsara.

गुकारश्चान्धकारस्तु रुकारस्तन्निरोधकृत्।

अन्धकारविनाशित्वाद्गुरुरित्यभिधीयते।।९।।

9. The letter ‘gu’ stands for darkness, the letter ‘ru’ stands for its removal. The Guru is so called because he removes the darkness (of ignorance).

कर्मणा मनसा वाचा सर्वदाऽऽराधयेद्गुरुम्।

दीर्घदण्डं नमस्कृत्य निर्लज्जो गुरुसन्निधौ।।१०।।

10. One should always worship the Guru by deed, thought and word. One should prostrate before the Guru without any inhibition.

साष्टाङ्गप्रणिपातेन ततो नित्यं गुरुं भजेत्।

भजनात्स्थैर्यमाप्नोति स्वस्वरूपमयो भवेत्।।११।।

11.The Guru should be worshipped every day by prostration with eight limbs. Thereby one will attain firmness of mind and realisation of one's real nature (as the Self).

दोर्भ्यां पद्भ्यां च जानुभ्यामुरसा शिरसा दृशा।

मनसा वचसा चेति प्रणामोऽष्टाङ्ग उच्यते।।१२।।

12. The eight limbs of prostration (sashtanga namaskara) are the hands, legs, knees, chest, head, eyes, mind and speech.

यत्सत्त्वेन जगत्सत्यं यत्प्रकाशेन भाति यत्।

यदानन्देन नन्दन्ति तस्मै श्रीगुरवे नमः।।१३।।

13. Prostration to the Guru (who is Brahman Himself), because of whose existence (as the substratum) the world appears real, because of whose effulgence all the creatures in the world are seen as existing and because of whose Bliss the creatures in the world enjoy happiness. (In this and the next verse the nature of Brahman, that It is Existence-Consciousness-Bliss, is attributed to the Guru also, to point out that the Guru and Brahman are to be looked upon as one and that the Guru should not be considered to be just the human form).

येन चेतयता हीदं चित्तं चेतयते नरः।

जाग्रत्स्वप्नसुषुप्त्यादि तस्मै श्रीगुरवे नमः।।१४।।

14. Prostrations to the Guru (Brahman), because of whose Consciousness the mind of man (all beings) has consciousness in the states of waking, dream and deep sleep.

ज्ञानशक्तिसमारूढतत्त्वमालाविभूषिणे।

भुक्तिमुक्तिप्रदात्रे च तस्मै श्रीगुरवे नमः।।१५।।

15. Prostrations to the Guru, mounted on the power of knowledge and adorned with the garland of Reality, who confers prosperity as well as liberation.

अनेकजन्मसम्प्राप्तकर्मबन्धविदाहिने।

ज्ञानानलप्रभावेन तस्मै श्रीगुरवे नमः।।१६।।

16. Prostrations to the Guru who burns by the power of the fire of knowledge the bondage of karma accumulated over innumerable lives.

शोषणं भवसिन्धोश्च दीपनं क्षरसम्पदाम्।

गुरोः पादोदकं यस्य तस्मै श्रीगुरवे नमः।।१७।।

17. The water with which the feet of the Guru have been washed dries up the ocean of trans-migration and burns (negates) all that is transient (as unreal). Prostrations to the Guru.

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।

न गुरोरधिकं ज्ञानं तस्मै श्रीगुरवे नमः।।१८।।

18. There is no greater Reality than the Guru, there is no greater austerity than (the worship of) the Guru, there is no knowledge greater than the Guru (who is Knowledge or Brahman Itself).

मन्नाथः श्रीजगन्नाथः मद्गुरुः श्रीजगद्गुरुः।

ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः।।१९।।

19.My Lord is the Lord of the universe, my Guru is the Guru of the universe (God), my Self is the
Self in all beings. Prostrations to the Guru.

गुरुरादिरनादिश्च गुरुः परमदैवतम्।

गुरुमन्त्रसमो नास्ति तस्मै श्रीगुरवे नमः।।२०।।

20. The Guru is the Cause, but has himself no cause or beginning. (This statement is made by identifying the Guru with Brahman, which is the Cause of the universe, but Itself has no cause. It is a fundamental principle in our tradition that the Guru should not be looked upon as a mere human being, but should be considered as Brahman or God Himself. The real import of many of the verses here can be properly understood only if this principle is kept in mind). The Guru is the supreme God. There is no mantra equal to the mantra of the Guru.

एक एव परो बन्धुः विवेके समुपस्थिते।

गुरुः सकलधर्मात्मा तस्मै श्रीगुरवे नमः।।२१।।

21. When proper discrimination arises, it will be realised that the Guru alone is the supreme well-wisher. The Guru is the essence of all Dharma. Prostrations to the Guru.

गुरुमध्ये स्थितं विश्वं विश्वमध्ये स्थितो गुरुः।

गुरुर्विश्वं नमस्तेऽस्तु तस्मै श्रीगुरवे नमः।।२२।।

22. The universe exists in the Guru and the Guru is in the universe. The Guru is himself the universe. Prostrations to the Guru.

भवारण्यप्रविष्टस्य दिङ्मोहभ्रान्तिचेतसः।

येन सन्दर्शितः पन्थाः तस्मै श्रीगुरवे नमः।।२३।।

23. Prostrations to the Guru who shows the way of liberation for those who have got caught in the forest of Samsara (transmigration) and are bewildered by delusion.

तापत्रयाग्नितप्तानां अशान्तप्राणिनां उमे।

गुरुरेव परा गङ्गा तस्मै श्रीगुरवे नमः।।२४।।

24. O Uma, for the creatures who are agitated in mind and tormented by the fire of the three kinds of affliction (those of the body, those from other creatures and those caused by divine forces), the Guru is like the great Ganga river. Prostrations to the Guru.

अज्ञानेनाहिना ग्रस्ताः प्राणिनस्तान् चिकित्सकः।

विद्यास्वरूपो भगवान् तस्मै श्रीगुरवे नमः।।२५।।

25. All living beings have been bitten by the snake of ignorance. The Lord in the form of knowledge (Guru) is the only physician for them. Prostrations to the Guru.

हेतवे जगतामेवं संसारार्णवसेतवे।

प्रभवे सर्वविद्यानां शम्भवे गुरवे नमः।।२६।।

26. Prostrations to the Guru who is Lord Siva Himself, who is the cause of the universe, who is the bridge for crossing the ocean of Samsara and who is the lord of all knowledge.

ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम्।

मन्त्रमूलं गुरोर्वाक्यं मुक्तिमूलं गुरोः कृपा।।२७।।

27. The form of the Guru is the object of meditation, the feet of the guru are the object of worship, the words of the Guru are the mantra and the grace of the Guru is the means of liberation.

**दृष्टान्तो नैव दृष्टस्त्रिभुवनजठरे सद्गुरोर्ज्ञानदातुः**
**स्पर्शश्चेत्तत्र कल्प्यस्स नयति यदहो स्वर्णतामश्मसारम्।**
**न स्पर्शत्वं तथापि श्रितचरणयुगे सद्गुरुः स्वीयशिष्ये**
**स्वीयं साम्यं विधत्ते भवति निरुपमस्तेन वाऽलौकिकोऽपि।।**

**(शतश्लोकी-१)**

There is nothing in all the three worlds that can be considered as comparable to the Sadguru who imparts Self-knowledge (Atmajnana). It may perhaps be thought that the legendary philosopher's stone would be a fit comparison, because it turns base metal into gold, just as the Guru turns an ordinary disciple into a realised soul. But even this comparison is not apt because, the philosopher's stone does not make the base metal turned into gold also a philosopher's stone like itself, whereas the Guru makes the disciple another Guru like himself. The Guru is therefore incomparable and most wonderful (transcending all the worlds).

।।श्री अभिनवविद्यातीर्थमहास्वामिनां अष्टोत्तरशतनामावलिः।।

१.ओम् अद्वैतविद्यारसिकाय नमः।

२ ,, अनुकम्पासरित्पतये ,,

३ अतिमानुषचारित्राय

४ अमृतोपमभाषणाय

५ अनेकमठनिर्मात्रे

६ अनेकदर्शनमर्मविदे

७ अन्नपूर्णाप्रतिष्ठात्रे

८ सन्नुतेशपदाम्बुजाय

९ अहन्ताममताहीनाय

१० अगजापतिभक्तिमते

११ आगमार्थपरिज्ञात्रे

१२ आश्रिताखिलरक्षकाय

१३ आशापाशसमुच्छेत्रे

१४ आपन्नार्तिविनाशकाय

१५ ईहाविरहितस्वान्ताय

१६ इभवक्त्रसुपूजकाय

१७ इन्दुमौलिपदध्यायिने

१८ इहामुत्रार्थनिस्पृहाय

१९ कर्माकर्मविभागज्ञाय

२० कीर्तनीयगुणोज्वलाय

२१ कामिताशेषफलदाय

२२ कोमलस्वान्तसंयुताय

२३ कालट्यादिपरिष्कर्त्रे

२४ कामक्रोधविवर्जिताय
२५ कराब्जविलसद्दण्डाय
२६ काषायाम्बरसंवृताय
२७ गुरुपादाम्बुजध्यायिने
२८ गणनीयगुणोज्वलाय
२९ चित्तनैर्मल्यसन्दायिने
३० चिन्तालेशविवर्जिताय
३१ तीर्थराजकृतस्नानाय
३२ तीर्थीकृतधरातलाय
३३ तुषाराचलसञ्चारिणे
३४ तुंगास्नानसमुत्सुकाय
३५ दक्षिणास्यपदध्यायिने
३६ दक्षिणाम्नायपीठपाय
३७ दाक्षिण्यनिलयस्वान्ताय
३८ दान्त्यादिपरिशोभिताय
३९ धर्माधर्मविभागज्ञाय
४० ध्याननिर्धूतकल्मषाय
४१ धर्मप्रचारनिरताय
४२ धिक्कृताखिलदुर्मताय
४३ नतलोकसमुद्धर्त्रे
४४ नियमाचरणोत्सुकाय
४५ न्यायमार्गानुसारिणे
४६ न्यायादिनयकोविदाय
४७ निगमागमतत्त्वज्ञाय

४८ नित्यसन्तुष्टमानसाय
४९ निष्कलङ्कसुचारित्राय
५० नीतितत्त्वसुबोधकाय
५१ पारावारातिगम्भीराय
५२ प्राणायामपरायणाय
५३ पुर्यादिक्षेत्रयात्राकृते
५४ पुराणागमतत्त्वविदे
५५ पालिताशेषभक्तौघाय
५६ पिङ्गलाब्दसमुद्भवाय
५७ बहुशिष्यसमायुक्ताय
५८ बहुभाषाविशारदाय
५९ ब्रह्मतत्त्वानुसन्धात्रे
६० ब्रह्मविद्योपदेशकाय
६१ भक्तहार्दतमोभेत्रे
६२ भिक्षुकोत्तमरूपधृते
६३ भेदवादीभपञ्चास्याय
६४ भुक्तिमुक्तिप्रदायकाय
६५ भयशोकादिरहिताय
६६ भवभीतिनिवारणाय
६७ महावाक्यविवेकज्ञाय
६८ महामहिमसम्युताय
६९ महाप्रज्ञासमायुक्ताय
७० मात्सर्यादिविवर्जिताय
७१ मधुरालापचतुराय

७२ मतिनिर्जितगीष्पतये
७३ मोदिताखिलभक्तालये
७४ मर्यादापरिपालकाय
७५ योगिवन्द्यपदाम्भोजाय
७६ योगमार्गविशारदाय
७७ राजाधिराजसम्पूज्याय
७८ रागद्वेषविवर्जिताय
७९ रुद्राक्षभूषितग्रीवाय
८० रुद्राराधनतत्पराय
८१ वशीकृतेन्द्रियग्रामाय
८२ वाग्देवीसमुपासकाय
८३ विद्यारण्यसमप्रज्ञाय
८४ विद्याविनयशोभिताय
८५ वेदशास्त्रपरित्रात्रे
८६ वादिमत्तेभकेसरिणे
८७ विदिताखिलशास्त्रार्थाय
८८ वीतरागजनस्तुत्याय
८९ व्याख्यासिम्हासनाधीशाय
९० व्याससूत्रार्थतत्त्वविदे
९१ शारदापूजनासक्ताय
९२ शारदेन्दुसमद्युतये
९३ शास्त्रतात्पर्यसंवेदिने
९४ शारदापीठनायकाय
९५ शंकराचार्यसंसेविने

९६ शंकाद्रिभिदुरोपमाय
९७ शमिताखिलसन्तापाय
९८ शमादिसुगुणालयाय
९९ श्रीविद्याजपनिष्णाताय
१०० श्रीचक्रार्चनतत्पराय
१०१ श्रीशेशभेदरहिताय
१०२ श्रीनृसिम्हपदार्चकाय
१०३ सञ्चारपूतधरणये
१०४ संसारार्णवनाविकाय
१०५ सत्यादिधर्मनिरताय
१०६ सर्वभूतदयापराय
१०७ अज्ञानध्वान्तमार्तण्डाय
१०८ विद्यातीर्थजगद्गुरवे नमः

इति श्रीभारतीतीर्थमहास्वामिभिः विरचिता
अष्टोत्तरशतनामावलिः।।